# Shri Premananda Stotram

# श्रीप्रेमानन्दस्तोत्रम्

## Document Information

Text title : Shri Premananda Stotram

File name : premAnandastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra, panchaka

Location : doc_deities_misc

Author : Swami Gunatitananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीप्रेमानन्दस्तोत्रम्

पवित्रं तेजसा पूर्णं तप्तकाञ्चनसन्निभं
परकोटि-सुविख्यात-भक्तोत्तम-पुरःस्थितम् ।
प्रेमाम्बुरसपूर्णेन्दुं शुद्धप्रेमैकनिर्भरं
वन्देऽहं परया भक्त्या प्रेमानन्दं वरोत्तमम् ॥ १॥

स्वर्णचम्पकसङ्काशं राधा-भावांश-सम्भवं
ईशकोट्यानुरन्तं सर्वाङ्गसुमहोज्ज्वलम् ।
जीवानां शुद्धिदातारं जीवकल्याणतत्परं
प्रेमानन्दमहं वन्दे दिव्यतेजोमहोज्ज्वलम् ॥ २॥

श्रीरामकृष्णशिष्याय शुद्धाधारमताय च
स्वयमेव वृणीताय याचिताय महात्मने ।
बाबूराम-सुभक्ताय मातुः प्रिय सुताय च
प्रेमानन्द-यतीन्द्राय प्रणामः श्रेयसे मम ॥ ३॥

प्रेमानन्द-दयासिन्धुं वैराग्य बाड़वान्वितं
रामकृष्णकलापूर्णं चन्द्राकर्षणमुल्लसम् ।
प्रेम-कर्म-त्याग-योग-तुल्य दृष्टि-सुशोभनं
प्रेमानन्दमहं वन्दे साधकाभीष्टसम्प्रदम् ॥ ४॥

यस्य श्रवणमात्रेण मनसो मलमञ्जसा
सुविदग्ध महो कृत्वा नरो निर्मलतां व्रजेत् ।
तद्ध्यान कीर्तनेनाथ सद्यो धन्यो भवाम्यहं
तत्कृपैकप्रसादेन मुक्ति सौख्यं त्यजाम्यहम् ॥ ५॥

इति स्वामिगुणातीतानन्दविरचितं “श्रीमत्प्रेमानन्दस्तोत्रम्” सम्पूर्णम् ।

प्रणाममन्त्रः-

राधाभावप्रमत्ताय प्रेमोज्ज्वलमनस्विने ।
भक्तानां च वरिष्ठाय प्रेमानन्दाय ते नमः ॥

Proofread by Aruna Narayanan

*Shri Premananda Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*